काम: क्रोधस्तथा लोभो मदो मोहोऽथ
पञ्चम: ॥
मात्सर्य्यं षष्ठमित्याहु: पैशुन्यं सप्तमं तथा ॥
असूयाष्टमी ज्ञेया इत्येता अष्ट मातर: ॥
कामं योगीश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ॥
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ।
मोह: स्वयन्तु कौमारी मात्सर्य्यं चैन्द्रजां विदु:॥
यामी दण्डधरा देवी पैशुन्यं स्वयमेव च ।
असूया वराहाख्या इत्येता: परिकीर्त्तिता: ॥
कामादिगण एषोऽयं शरीरं परिकीर्त्तितम् ।
जयाह मूर्त्तिन्तु यथा तथा ते कीर्त्तितं मया ॥
एताभिर्देवताभिश्च तस्य रक्ते तु शोषिते ।
क्षयं गतासुरी माया स च सिद्धोऽन्धकोऽभवत् ॥
एतत्ते सर्व्वमाख्यातमात्मविद्यान्तरं मया ।
य एतच्छृणुयान्नित्यं मातृणासम्भवं शुभम् ॥
तस्य ता: सर्व्वदा रक्षां कुर्व्वन्त्यनुदिनं नृप ! ।
येनैतत् पठ्यते जन्म मातृणां पुरुषोत्तम ! ॥
स धन्य: सर्व्वदा लोके शिवलोकञ्च गच्छति ।
तासाञ्च ब्रह्मणा दत्ता अष्टमी तिथिरुत्तमा ॥
एता: संपूजयेद्भक्त्या विल्वाहारो नर: सदा ।
तस्य ता: परितुष्टाश्च क्षेमारोग्यं ददन्ति च ॥”
इत्यादि वाराहपुराणे कामादिमातृगणोत्पत्ति-
र्नामाध्याय: ॥ अपि च ।
“ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तय: ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययु: ॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलु: ।
आयाता ब्रह्मण: शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढ़ा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरुड़ोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरे: ।
शक्ति: साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपु: ।
प्राप्ता तत्र शटाक्षेपक्षिप्तनक्षत्रसंहति: ॥
वज्रहस्ता तथैवैन्द्री गजराजोपरिस्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
तत: परिवृतस्ताभिरीशानो देवशक्तिभि: ।
हन्यन्तामसुरा: शीघ्रं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ॥”
इति मार्कण्डेयपुराणम् ॥
मातृवर्गो यथा,—
“गुरो: पत्नी राजपत्नी विप्रपत्नी च या सती ।
पत्नी च भ्रातृसुतयोर्मित्रपत्नी च तत्प्रसू: ॥
प्रसू: पित्रोस्तयोर्भ्रातु: पत्नी श्वश्रू: स्वकन्यका ।
जननी तनुसपत्नी च भगिनी सुरभी तथा ॥
स्वामीश्वसुरपत्नी च धात्री कान्ताप्रदायिका ।
गर्भधात्रीस्वनाम्नी च भयात्त्रातुश्च कामिनी ॥
एता वेदप्रणीताश्च सर्व्वेषां मातर: स्मृता: ।
एतास्वपि च सर्व्वासु न्यूनता नास्ति कासु च ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्याय: ॥
षोड़श मातरो यथा,—
“गुरुपत्नी राजपत्नी देवपत्नी तथा वधू: ।
पित्रो: स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ॥
पितृपत्नी भ्रातृपत्नी श्वश्रूश्च भगिनीसुता ।
गर्भधात्रीष्टदेवी च पुंस: षोड़श मातर: ॥”
इति तत्रैव ५९ अध्याय: ॥
अथ मातृकान्यास: ।
भगवानुवाच ।
“मातृकान्यासमधुना शृणु वेतालभैरव ! ।
येन देवत्वमायाति नरोऽपि विहितेन वै ॥
वाग्ब्रह्माणीमुखा देव्यो मातृका: परि-
कीर्त्तिता: ।
तासां मन्त्राणि सर्व्वाणि व्यञ्जनानि स्वरास्तथा ॥
चन्द्रबिन्दुप्रयुक्तानि सर्व्वकामप्रदानि च ।
ऋषिस्तु मातृमन्त्राणां ब्रह्मैव परिकीर्त्तित: ॥
प्रोक्ता छन्दस्तु गायत्री देवता च सरस्वती ।
शरीरशुद्धिप्रमुखसर्व्वकामार्थसाधने ॥
विनियोग: समुद्दिष्टो मन्त्राणां न्यूनपूरणे ।
अकारेण समं कादिवर्गो य: प्रथम: स्मृत: ॥
तैश्चन्द्रबिन्दुसंयुक्तैश्चतस्रेरक्षरैर्बहि: ।
आकारञ्च तथोच्चार्य्य अङ्गुष्ठाभ्यां नमस्तथा ।
प्रथमं मातृकामन्त्रमङ्गुष्ठद्वयतो न्यसेत् ॥
परे वर्गा: स्वरै: सार्द्ध ये वान्ये न्यासकर्म्मणि ।
ते सर्व्वे चन्द्रबिन्दुभ्यां युक्ता: कार्य्यास्तु सर्व्वत: ॥
ह्रस्वेकारस्य वर्गेण दीर्घेकारान्तगेन तु ।
तर्ज्जन्योर्विन्यसेत् सम्यक् स्वाहान्तेन तु पूर्व्ववत् ॥
ह्रस्वोकारस्य वर्गेण दीर्घोकारान्तगेन तु ।
मध्यमायुगले सम्यक् वषड़न्तेन विन्यसेत् ॥
एकारादितवर्गान्त ऐकारान्तेन चैव हुम् ।
न्यसेदनामिकायुग्मे नियतं तत्र भैरव ! ॥
ओकारादिपवर्गन्तु औकारान्तेन शेषितम् ।
वौषड़न्तं कनिष्ठायां विन्यसेत् कार्य्यसिद्धये ॥
अंकारादियकारादिवर्गेण क्षान्तकेन च ।
अ: इत्यन्तेन तलयोर्विन्यसेत् पाणिपृष्ठयो: ॥
वषट्कारं शेषभागे मन्त्रन्यासे नियोजयेत् ।
हृदयादिषड़ङ्गेषु पूर्व्ववत् क्रमतो न्यसेत् ॥
अङ्गुष्ठाद्युक्तवर्गैस्तु क्रमात् षड्भिस्तथाविधै: ।
पुनस्तथा पादजानुसक्थिगुह्ये तु पार्श्वयो: ।
वस्तौ च विन्यसेन्मन्त्रान् क्रमात् पूर्व्ववदक्षरै: ॥
बाह्वो: पाण्योस्तथा कण्ठे नाभौ च जठरे
तथा ।
स्तनयोरपि विन्यासं तथा षड्भि: समाचरेत् ॥
वक्त्रे च चिवुके गण्डे कर्णयोश्च ललाटके ।
अंसे कक्षे च षड्वर्गै: पूर्व्ववन्न्यासमाचरेत् ॥
रोमकूपे ब्रह्मरन्ध्रे गुदे जङ्घायुगे तथा ।
नखेषु पादपार्ष्णोश्च तथा पूर्व्ववदाचरेत् ॥
एवन्तु मातृकान्यासं य: कुर्य्यान्नरसत्तम: ।
स धर्म्मयज्ञे पूजासु पूतो योग्यश्च जायते ॥
नात: परतरं मन्त्रं विद्यते क्वचिदेव हि ।
य: सर्व्वकामदं पुण्यं चतुर्व्वर्गफलप्रदम् ॥
वाग्देवतां हृदि ध्यात्वा मूर्द्ध्नि सर्व्वाक्षराणि
च ॥
त्रिधा च मातृकामन्त्रै: संक्रमेश्च पिबेज्जलम् ।
स वाग्मी पण्डितो धीमान् जायते च वर:
कवि: ॥
चन्द्रबिन्दुसमायुक्तान् स्वरान् पूर्व्वान् पठेद्बुध: ।
व्यञ्जनानि च सर्व्वाणि केवलानि पठेत्तत: ॥
अकारादिक्षकारान्तान्येवं न्यासैस्तु पूर्व्वकै: ।
जलं करतले गृह्य पठित्वाक्षरसंचकम् ॥
अभिमन्त्र्य तु तत्तोयं प्रथमं पूरकै: पिबेत् ।
कुम्भकेन द्वितीयन्तु तृतीयन्त्वथ रेचकै: ॥
एवं सकृत्त्रिवारन्तु पीत्वा तोयं विचक्षण: ।
दृढ़ाङ्ग: पण्डितो भूयात् पुत्त्रपौत्त्रसमन्वित: ॥
त्रिसन्ध्यमथ पीत्वैव मातृकामन्त्रमन्त्रितम् ।
तोयं कवित्वमाप्नोति सर्व्वान् कामांस्तथैव च ॥
सततं कुरुते यस्तु मातृकामन्त्रमन्त्रितम् ।
तोयपानं महाभाग: पूरककुम्भरेचकै: ॥
स सर्व्वकामान् संप्राप्य पुत्त्रपौत्त्रसमृद्धिमान् ।
भूत्वा महाकविर्लोके बलवान् सत्यविक्रम: ॥
सर्व्वत्र वल्लभो भूत्वा चान्ते मोक्षमवाप्नुयात् ।
राजानमथवा राजभार्य्यां पुत्त्रमथापि वा ॥
वशीकरोति न चिरात् मातृकामन्त्रपालक: ।
न्यासक्रमे क्रम: प्रोक्तो वर्गक्रम इहैव तु ॥
अक्षराणां क्रमेणाथ तोयपानं समाचरेत् ।
ये ये मन्त्रा देवतानान्दषीणामथ रक्षसाम् ॥
ते मन्त्रा मातृकामन्त्रे नित्यमेव प्रतिष्ठिता: ।
सर्व्वमन्त्रमयश्चायं सर्व्वदेवमयस्तथा ॥
चतुर्व्वर्गप्रदश्चायं मातृकामन्त्र उच्यते ।
इति ते कथित: पुत्त्र ! मातृकान्यास उत्तम: ॥”
इति श्रीकालिकापुराणे मातृकान्यास: ७६ अ: ॥
अथ तस्य प्रयोग: ।
अस्य मातृकामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो मातृकासरस्वती देवता हलो बीजानि स्वरा: शक्तयो मातृकान्यासे विनियोग: । शिरसि ॐ ब्रह्मणे ऋषये नम: । मुखे ॐ गायत्रीच्छन्दसे नम: । हृदि ॐ मातृकासरस्वत्यै देवतायै नम: । गुह्ये ॐ व्यञ्जनेभ्यो बीजेभ्यो नम: । पादयो: ॐ स्वरेभ्य: शक्तिभ्यो नम: । तथा च ज्ञानार्णवे ।
“मातृकां शृणु देवेशि ! न्यसेत् पापनिकृन्त-
नीम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रीच्छन्द उच्यते ॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम् ।
शक्तयस्तु स्वरा देवि ! षड़ङ्गन्यासमाचरेत् ॥”
तत: षड़ङ्गन्यासौ । अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नम: । इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा । उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् । एं तं थं दं धं नं ऐं अना-मिकाभ्यां हुम् । ॐ पं फं बं भं मं औं कनि-ष्ठाभ्यां वौषट् । अं यं रं लं वं शं षं सं हं लं